**CLASS : 12th (Sr. Secondary)** **Code No. 4305**

**Series : SS-M/2019**

*रोल नं०* | | | | | | | | | | | **SET : B**

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **17** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित - अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा निम्नाङ्कितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

पर्यटनं रोमाञ्चकारी प्रियजनैः सह कृतं पर्यटनं आनन्दं ददाति। पर्यटनेन ज्ञानवृद्धिः मनोरञ्जनं च भवतः। अन्यच्च यत् स्वयं दृश्यते अनुभूयते च तत् ज्ञानं स्थिरतरं भवति। कस्मिन् देशे प्रदेशे वा किं किं भुज्यते, किं पीयते ? कथं व्यवहारः क्रियते ? का तत्रत्या वेशभूषा ? के च उत्सवाः ? एतत् सर्वं पर्यटनेन ज्ञायते। पर्यटन-उद्योगेन भारतशासनं पर्याप्तं धनं लभते। अतः इयम् उद्योगं वर्धयितुं शासनं यत्नशीलम् अस्ति।

***प्रश्नाः*** – $2 \times 5 = 10$

(क) पर्यटनं कीदृशम् ?

(ख) पर्यटन-उद्योगेन भारतशासनं किं लभते ?

(ग) कैः सह कृतं पर्यटनं आनन्दं ददाति ?

(घ) पर्यटनेन लब्धं ज्ञानं कीदृशं भवति ?

(ङ) पर्यटनेन कस्य वृद्धिः भवति ?

**खण्डः 'ख'**

**(रचनात्मकं – कार्यम्)**

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया लिखत – 6

(क) मम प्रियं पुस्तकं (गीता)।

(ख) प्रातःकालीन भ्रमणम्।

(ग) अनुशासनम्।

**खण्डः 'ग'**

**(पठित – अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) निश्चितं किल सिद्धैः स्वर्गनरकादिकं सर्वं ब्रह्माण्डान्न किञ्चिद्बहिरस्तीति। ते सप्तगगनाश्रिताः सप्त ग्रहाः स्वर्गं परितो मेंखलावत् परिभ्रमन्ति इति वदन्ति, न स्वर्गस्योपरि।

**अथवा**

(ख) तावदकस्मादुत्थितो महान् झञ्झावातः, एकः सायंसमयप्रयुक्तः स्वभाववृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः। झञ्झावातोद्धूतैः रेणुभिः शीर्णपत्रैः कुसुमपरागैः शुष्कपुष्पैश्च पुनरेष द्वैगुण्यं प्राप्तः।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) असूर्या नाम ते लोका अन्धेन तमसाऽऽवृताः।

तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।

**अथवा**

(ख) जनस्य साकेतनिवासिनस्तौ

द्वावप्य भूतामभिनन्द्यसत्वौ।

गुरुप्रदेयाधिकनिःस्पृहोऽर्थी

नृपोऽर्थिकामादधिकप्रदश्च।।

**5.** अधोलिखितासु सूक्तिषु मात्र***द्वयोः*** सूक्तयोः भावार्थं हिन्दीभाषया लेख्यम् – $2 \times 2 = 4$

(क) स्वर्गभूमिं कुर्शीति वदन्ति।

(ख) अस्माभिः पर्वताः शंकवः कृताः।

(ग) हरति अतिमलिनमपि दोषजातं गुरूपदेशः।

(घ) विगुणः कार्षापणः, कुत्सितश्च पुत्रः संकटे कदाचिदुपयुक्तो भवेत्।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

अहो असारोऽयं संसारः, कदा कस्य किं भविष्यति इति न ज्ञायते। यच्चोपार्जितानां वित्तं तदपि दानभोगैर्विना सफलं न भवति।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) अयं संसारः कीदृशः अस्ति ?

(ख) 'कस्य' इति पदे का विभक्तिः ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखनीयानि –

अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम्।

रमते न मरालस्य मानसं मानसं विना।।

***प्रश्नाः*** – $2 \times 1 = 2$

(क) सर्वत्र कीदृशं नीरम् अस्ति ?

(ख) 'अस्ति' इति पदे कः पुरुषः ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – $2 \times 1 = 2$

(क) <u>मनुष्याणां</u> हिंसावृत्तिस्तु निरवधिः।

(ख) <u>शब्दार्थौ</u> सत्कविरिव द्वयं विद्वानपेक्षते।

### खण्डः 'घ'

### (संस्कृतसाहित्यस्य - परिचयः)

**9.** महाकविबाणभट्टस्य ***अथवा*** भट्टमथुरानाथशास्त्रिणः संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) शिवराजविजयम्।

(ii) पाषाणीकन्या।

### खण्डः 'ङ'

### (छन्दोऽलङ्कार - परिचयः)

**11.** अधोनिर्दिष्टछन्दस्सु मात्र***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – 2 × 4 = 8

(क) इन्द्रवज्रा (ख) उपजातिः

(ग) शिखरिणी (घ) मालिनी

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8

(क) श्लेषः (ख) अनुप्रासः

(ग) अन्योक्तिः (घ) उपमा

### खण्डः 'च'

### (अनुप्रयुक्त - व्याकरणम्)

**13.** 'अयादिसन्धेः' ***अथवा*** 'गुणसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**14.** 'कर्मकारकस्य' ***अथवा*** 'अपादानकारकस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**15.** 'अव्ययीभावस्य' ***अथवा*** 'द्विगुसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**खण्डः 'छ'**

**[ बहुविकल्पीय - वस्तुनिष्ठप्रश्नाः ]**

**16.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 6 × 1 = 6

(क) 'अश्वोऽश्वः' इति पदे कः सन्धिविच्छेदः ?

(i) अश्वो + श्वः (ii) अश्वः + अश्वः

(iii) अश्व + अश्वः (iv) अश्वो + अश्वः

(ख) 'न + उपसर्पति' इति पदे किं सन्धिपदम् ?

(i) नोपसर्पति (ii) नेपसर्पति

(iii) नुपसर्पति (iv) नौपसर्पति

(ग) 'तथापि' इति पदे कः सन्धिः ?

(i) दीर्घसन्धिः (ii) गुणसन्धिः

(iii) वृद्धिसन्धिः (iv) यण्सन्धिः

(घ) 'कुलव्रतम्' इति पदे विग्रहोऽस्ति ?

(i) कुलात् व्रतम् (ii) कुलं व्रतम्

(iii) कुलस्य व्रतम् (iv) कुलेषु व्रतम्

(ङ) 'उष्णरश्मिः' इति पदे कः समासः ?

(i) कर्मधारयः (ii) द्विगुः

(iii) तत्पुरुषः (iv) बहुव्रीहिः

(च) 'राज्ञः समीपम्' इति विग्रहे किं समस्तपदम् ?

(i) राजासमीपम् (ii) उपराजम्

(iii) राज्ञासमीपम् (iv) राज्ञसमीपम्

**17.** लघूत्तरात्मक प्रश्नाः — $10 \times 1 = 10$

(i) 'अस्मद्' प्रथमाविभक्तौ एकवचने किम् रूपम् ?

(ii) 'तस्य' इति पदे का विभक्तिः ?

(iii) 'पृच्छति' इति पदे कः लकारः ?

(iv) 'अब्रवीत्' इति पदे कः पुरुषः ?

(v) 'कुर्वन्' इति पदे कः प्रत्ययः ?

(vi) 'आ + गम् + ल्यप्' एतेषां संयोगे किं रूपम् ?

(vii) 'विना' इति उपपदयोगे का विभक्तिः ?

(viii) 'जलम्' इति पदस्य पर्याय पदं लिखत ?

(ix) 'कमलम्' इति पदस्य समानार्थकपदमस्ति।

(x) 'मूर्खः' इति पदस्य विलोमपदमस्ति।